# शास्त्रशेषप्रकरणे प्रश्नाः

उदयशंकर खाटुया

१. **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्** – अस्याः परिभाषायाः कोऽर्थः? परिभषाया अस्याः ज्ञापने किं मानम् ? अस्याः अप्रवृत्तिस्थलानि सोदाहरणमुल्लिख्यताम् । २+२+६ = १०

**उत्तरम् –**

यत्र सूत्रेषु केवलं प्रातिपदिकं गृह्यते तत्र प्रयोजने सति लिङ्गैः स्त्र्यादिभिः सहितस्य प्रातिपदिकस्यापि ग्रहणं भवति। तद्यथा अतः कृकमिकंसकुम्भकुशाकर्णीष्वनव्ययस्य इति सूत्रे कुम्भशब्दस्य एव ग्रहणात् अयस्कुम्भी इत्यत्र तु कुम्भी इति उत्तरपदसत्त्वात् अकारोत्तरवर्तिनः विसर्गस्य सकारो न स्यात् । परन्तु अस्यां परिभाषायां स्वीकृतायां सूत्रे कुम्भ इति प्रातिपदिकग्रहणेन लिङ्गविशिष्टस्य कुम्भी इति शब्दस्य ग्रहणात् स दोषः न भवेत् ।

नागेशेन अस्याः परिभाषायाः ज्ञापकत्वे कुमारः श्रमणादिभिः इति सूत्रस्य उदाहरणं प्रदत्तम् । सूत्रमिदं समानाधिकरणस्य अधिकारे पठ्यते। तस्मात् द्वयोः समानलिङ्गकयोः एव समासः भवेत् । परन्तु कुमारः इति पुंलिङ्गे वर्तते श्रमणा इति च स्त्रियां वर्तते । अतः लिङ्गभिन्नात् द्वयोः सामानाधिकरण्यमसम्भवम्। तस्मात् कुमारपदं व्यर्थं भवति। परन्तु पाणिनिः एकः ऋषिः । तस्य आप्तत्वात् न तत् सूत्रघटकं पदं भ्रान्तमिति वक्तव्यम् ।वस्तुतः व्याकरणे यत् किमपि व्यर्थं भवति चेत् तत् ज्ञापकं भवति। अतः कुमारपदं व्यर्थं सद् इमां परिभाषां ज्ञापयति । तेन कुमारपदं लिङ्गसहितं गृहीत्वा कुमारीति क्रियते । तेन न श्रमणा पदेन सामानाधिकरण्यानुपपत्तिः।

नैषा परिभाषा सर्वत्र प्रवर्तयितुं शक्यते। कुत्र अस्याः प्रवृत्तिः न भवति इति विषये नागेशेन तदीये ग्रन्थे विस्तरशः आलोचितम् । अधः एकैकशः आलोच्यते-

# शास्त्रशेषप्रकरणे प्रश्नाः

उदयशंकर खाटुया

क) इयं परिभाषा "**द्विषत्परयोस्तापे**" इति सूत्रविषये न प्रवर्तते। सूत्रेणानेन द्विषत् शब्दे उपपदे सति तपशब्देन समासे खच्प्रत्ययो भवति । यतः परिभाषेयमत्र उपपदविधौ न प्रवर्तते अतः द्विषन्तपः इतिवत् द्विषतीताप इत्यत्र खच् न स्यात् ।

ख) समासान्तविधौ नैषा परिभाषा प्रवर्तते। तेन राजाहःसखिभ्यष्टच् इति सूत्रेण यथा मद्रराजशब्दोत्तरः टच् विधीयते तथैव मद्राणां राज्ञी मद्रराज्ञी इत्यत्र न भवेत्।

ग) **"आन्महतः समानाधिकरणजातीययोः"** इत्यनेन समानाधिकरणयोः समासे महतः यद् आत्वं भवति तत् महती प्रिया यस्य स इति महतीप्रियः इत्यत्र आत्वापत्तिः स्यात्। आत्त्वापत्तौ अनिष्टापत्तिः, अतः परिभाषेयं नात्र प्रवर्तते।

घ) **"ञ्नित्यादिर्नित्यम्"** इति सूत्रेण विहितायां आद्युदात्तस्वरविधौ इयं परिभाषा न प्रवर्तते। तेन दक्षस्यापत्यं पुमान् इति दाक्षिः(दक्ष+इञ्) इत्यत्र यथा आदिस्वरः उदात्तो भवति तथैव दक्षस्यापत्य स्त्री इति दाक्षी इत्यत्र आद्युदात्तो न भवति।

**ङ)** यतः परिभाषेयं न प्रवर्तते अतो "**राजा च**" इत्यनेन ब्राह्मणकुमारशब्दयोः परयोः पूर्वपदस्य राज्ञः विधीयमानः प्रकृतिस्वरः राजब्राह्मणी राजकुमारी इत्यत्र न भवेत् ।

**च) बहोर्नञ्वदुत्तरपदभूम्नि** इत्यनेन य समाससंघातो भवति तत्रेयं परिभाषा न प्रवर्तते। तेन बहवो गोमन्तो यस्मिन् स बहुगोमान् इत्यादौ यथा नञ्पूर्वपदकसमासस्य अन्तोदात्तत्वमतिदिश्यते तथैव बहुगोमती इत्यत्र न भवेत् ।

छ) **विभक्तिं निमित्तीकृत्य यत् कार्यं भवति तत्रापि नेदं परिभाषा प्रवर्तते।** तेन गोमान् इत्यादौ यथा "**उगिदचाम् सर्वनामस्थानेधातोः"** इत्यनेन सर्वनामस्थानविभक्तौ परे सति यः नुमागमो भवति स गोमती इत्यादौ न भवति।

# शास्त्रशेषप्रकरणे प्रश्नाः

उदयशंकर खाटुया

एवं नागेशेन अप्रवृत्तिस्थलानां परिगणनं कृतमित्यलं विस्तरेणेति शिवम् ।